
# श्री नृसिंहाष्टकम्



यं ध्यायसे स क्व तवास्ति देव इत्युक्त ऊचे पितरं सशस्त्रम् ।
प्रल्हाद आस्तेऽखिलगो हरिः स लक्ष्मीनृसिंहोऽवतु मां समन्तात् ।। १ ।।

तदा पदाताडयदादितैत्यः स्तंभो ततोन्हाय घुरुरुशब्दम् ।
चकार यो लोकभयंकरं स लक्ष्मीनृसिंहोऽवतु मां समन्तात् ।। २ ।।

स्तंभं विनिर्भिद्य विनिर्गतो यो भयंकराकार उदस्तमेघः ।
जटानिपातैः स च तुंगकर्णो लक्ष्मीनृसिंहोऽवतु मां समन्तात् ।।३।।

पंचाननास्यो मनुजाकृतिय भयंकरस्तीक्षणनखायुधोऽरिम् ।
धृत्वा निजोर्वोर्विददार सोऽसौ लक्ष्मीनृसिंहोऽवतु मां समन्तात् ।।४।।

Sree Datta Vaibhavam
A Path For Spiritualistic & Materialistic Development

वरप्रदोक्तेरविरोधतोऽरिं जघान भृत्योक्तमृतं हि कुर्वन्।
स्रग्वत्तदंत्रं निदधौ स्वकंठे लक्ष्मीनृसिंहोऽवतु मां समन्तात् ।। ५ ।।

विचित्र देहोऽपि विचित्रकर्मा विचित्रशक्तिः स च केसरीह।
पापं च तापं विनिवार्य दुःखं लक्ष्मीनृसिंहोऽवतु मां समन्तात् ॥६॥

प्रल्हादः कृतकृत्योऽभूद्यत्कृपालेशतोऽमराः ।
निष्कंटकं स्वधामापुः श्रीनृसिंहः स पातु माम् ।।७।।

दंष्ट्राकरालवदनो रिपूणां भयकृद्भयम्|
इष्टदो हरति स्वस्य वासुदेवः स पातु माम् ॥ ८ ॥

इति श्री.प.प. श्रीवासुदेवानंदसरस्वतीविरचितं श्रीलक्ष्मीनृसिंहाष्टकं समाप्तम् ।।

SREEGURU DATTA PRASANNOSTHU
Sree Datta Vaibhavam
A Path For Spiritualistic & Materialistic Development